व्रतानि च । ब्रह्मचारी भवेदूर्द्ध्वं ततः स्नातो भवेद्गृही । द्विविधो ब्रह्मचारी तु स्मृतः शास्त्रे मनीषिभिः । उपकुर्व्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः स्मृतः । योगृहाश्रममास्थाय ब्रह्मचारी भवेत् पुनः । न यतिर्न वनस्थश्च सर्वाश्रमविवर्ज्जितः । अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः । जपे होमे तथा दाने स्वाध्याये च रतस्तु यः । नासौ तत्फलमाप्नोति कुर्व्वाणोऽप्याश्रमाच्च्युतः । त्रयाणामानुलोम्यं हि प्रातिलोम्यं न विद्यते । प्रातिलोम्येन योयाति न तस्मात् पापकृत्तमः” दक्षवचनमपि वेदाध्ययनोत्तरस्नातकानामेवोपक्रमे कीर्त्तनात् अन्ते च त्रयाणामाश्रमाणामानुलोम्यविधानाच्च द्विजमात्रविषयकम् यत्तु तद्वाक्यैकदेशमादाय रघुनन्दनेन अनाश्रमी न तिष्ठेत्त्वित्यादि वाक्यं शूद्रोपलक्षणपरमुक्तं न तद्युक्तमुपक्रमोपसंहाराभ्यां द्विजमात्रविषयकत्वनिश्चयात् । किञ्च त्रयाणामानुलोम्योक्तेरपि न शूद्रविषयकत्वं तत्प्रदर्शितवामनपुराणवचने शूद्रस्यैकमात्राश्रमावगतेः तथा च येषामेव आश्रमचतुष्टयं तत्त्रयं तद्द्वयं वा सम्भवति तेषामेवानुलोम्यप्रातिलोम्यसम्भव एकमात्राश्रमस्य शूद्रस्य कथन्तरामानुलोम्यप्रातिलोम्यसम्भवः । एतेन “व्रतेषु लोपकोयस्तु आश्रमाद्विच्युतश्च यः । संदंशयातनामध्ये पततस्तावुभावपि” इति भविष्यपुराणवचनेन दक्षस्मृतेः सङ्कोचनमपि परास्तम् “श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते । तत्र श्रौतं प्रमाणं तु तयोर्द्वैधे स्मृतिर्वरेति” विधान पा० धृतव्यासवाक्येन पुराणापेक्षया स्मृतेर्वरत्वकीर्त्तनेन पुराणेन स्मृतेर्बाधस्यायोग्यत्वात् “विरोधे त्वनपेक्षमसति ह्यनुमानमिति” जैमिनिसूत्रेण श्रुतिस्मृत्योर्विरोधे स्मृतेराप्रामाण्यस्येव स्मृतिपुराणयोर्विरोधेऽपि पुराणस्याप्रामाण्यस्यैवोचितत्वात् वस्तुतः नात्र विरोधः “स्पष्टस्य तु विधेर्नान्यैरुपसंहार इष्यते” इतिन्यायेनार्थक स्मृतौ द्विजपदस्य स्पष्टतया अन्योपसंहारकत्वासम्भवेन पौराणिकयच्छब्दस्यास्पष्टार्थकतया तत्परत्वकल्पनेनैवोपपत्तौ विरोधाभावात् तथा च भविष्यपुराणवचनमेव द्विजातिविषयकं न शूद्रविषयकमित्येव कल्पनीयमिति । अत्रेदं विवेक्तव्यं किं पौराणिकास्पष्टार्थकयच्छब्दस्य यावद्वर्णविषयकत्वमुत स्पष्टार्थकस्मृत्येकवाक्यतया त्रैवर्णिकमात्रविषयकत्वं तत्र पुराणेन स्मृतेर्बाधायोगेन पौराणिकयच्छब्दस्यैव स्मृत्युक्तत्रिवर्णपरत्वकल्पनं युक्तमित्युत्पश्यामः । यदपि ‘चत्वार आश्रमाश्चैव ब्राह्मणस्य प्रकीर्त्तिताः । ब्रह्मचर्य्यञ्च गार्हस्थ्यं वानप्रस्थञ्च भिक्षुकम् । क्षत्रियस्यापि कथिता आश्रमास्त्रय एव हि । ब्रह्मचर्य्यञ्च गार्हस्थ्यमाश्रमद्वितयं विशः । गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्” वाम० पु० वाक्यं तत् शूद्रस्य गार्हस्थ्यमात्राधिकारबोधकम् । न तु तदकरणे पापजनकताबोधकमपि उचितमिति पदस्वारस्यात् उचितपदस्य योग्यार्थकत्वात् तेनैव उद्वा० त० क्षणमुत्सवमिति व्याख्यानेन तदीयगृहस्थाश्रमस्योत्सवार्थकत्वोक्त्या काम्यत्वसूचनात् “चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि । स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः । अष्टाचत्वारिंशदब्दं वयोयावन्न पूर्य्यते । भार्य्यापुत्रवियुक्तस्य नास्ति यज्ञेऽधिकारितेति” भविष्यपुराणवचनमपि यज्ञेऽधिकारिताप्रतिषेधात् द्विजविषयकमेव शूद्रस्य यज्ञेऽनधिकारात् । द्विजातीनामेव यज्ञीयाज्यावेक्षणादेः पत्नीसाध्यतया पत्न्यभावे कथमाज्यावेक्षणाद्यङ्गसिद्धिरिति युक्तः तेषामनधिकारः” यज्ञाधिकारे शूद्रस्य पर्य्युदस्ततया तदधिकाराभावकथनमनर्थकं स्यात् । अतो येषामेव यज्ञाधिकारस्तेषामेव भार्य्याराहित्ये अनधिकारिताप्रतिपादने वचनं सार्थकम् । तेन तद्द्विजविषयकमेव । एवं प्रागुक्तदक्षवचने जपे होमे तथा दाने स्वाध्याये निष्फलत्वकथनमपि उपक्रमोपसंहाराभ्यां होमस्वाध्याययोर्द्विजातीनामेव सम्भवाच्च द्विजातिविषयकमेव । अतः शूद्राणां विवाहस्य उत्सवार्थतया काम्यत्वेनाकरणे न प्रत्यवाय इति सुस्थितम् । एतेन बहुविवाहवादे मया दक्षवचनस्य द्विजपदस्योपलक्षणार्थकत्वं यत् खण्डितं तत् सुस्थितमेवेति द्रष्टव्यम् ।

**आप्लाव** पु० आ+प्लु-पक्षे घञ् । आप्लवशब्दार्थे । [व्याप्ते ।

**आप्लावित** त्रि० आ+प्लु—णिच्—क्त । जलादिप्रवाहेनाभि-

**आप्लाव्य** त्रि० आ-प्लु—नि० कर्त्तरि ण्यत् । १आप्लवनकारके । भावे ण्यत् । २कर्त्तव्याप्लवने न० । कर्मणि ण्यत् । जलादिना ३अभिव्याप्ये त्रि० ।

**आप्लुत** त्रि० आ+प्लु-क्त । १स्नाते २आर्द्रीभूते च ३स्नातके गृहस्थभेदे पु० । भावे क्त । ४स्नाने न० ।

**आप्लुतव्रतिन्** पु० आप्लुतस्य स्नातस्य व्रतमस्त्यस्य इनि । स्नातके गृहस्थभेदे । आप्लवव्रतिशब्दे विवृतिः ।

**आप्लुत्य** अ० आ+प्लु-ल्यप् । स्नात्वेत्यर्थे, २उत्प्लुत्य उल्लम्फ्येत्यर्थे च ।

**आप्लुष्ट** त्रि० आ+प्लुष—क्त । १ईषद्दग्धे २सम्यग्दग्धे च ।